# Krishna Chandra Ashtakam

# કૃષ્ણચન્દ્રાષ્ટકમ્

## Document Information

Text title : kRRiShNachandrAShTakam 3

File name : kRRiShNachandrAShTakam3.itx

Category : aShTaka, vishhnu, krishna, vishnu

Location : doc_vishhnu

Latest update : September 19, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

# કૃષ્ણચન્દ્રાષ્ટકમ્

અમ્બુદાઞ્જનેન્દ્રનીલનિન્દિકાન્તિડમ્બરઃ
    કુઙ્કુમોદ્યદર્કવિદ્યુદંશુદિવ્યદમ્બરઃ ।
શ્રીમદઙ્ગચર્ચિતેન્દુપીતનાક્તચન્દનઃ
    સ્વાઙ્ઘ્રિદાસ્યદોઽસ્તુ મે સ બલ્લવેન્દ્રનન્દનઃ ॥ ૧॥

ગણ્ડતાણ્ડવાતિપણ્ડિતાણ્ડજેશકુણ્ડલ-
    શ્ચન્દ્રપદ્મષણ્ડગર્વખણ્ડનસ્યમણ્ડલઃ ।
બલ્લવીષુ વર્ધિતાત્મગૂઢભાવબન્ધનઃ
    સ્વાઙ્ઘ્રિદાસ્યદોઽસ્તુ મે સ બલ્લવેન્દ્રનન્દનઃ ॥ ૨॥

નિત્યનવ્યરૂપવેષહર્દકેલિચેષ્ટિતઃ
    કેલિનર્મસાર્મદાયિમિત્રવૃન્દવેષ્ટિતઃ ।
સ્વીયકેલિકાનનાંશુનિર્જિતેન્દ્રનન્દનઃ
    સ્વાઙ્ઘ્રિદાસ્યદોઽસ્તુ મે સ બલ્લવેન્દ્રનન્દનઃ ॥ ૩॥

પ્રેમહેમમણ્ડિતાત્મબન્ધુતાભિનન્દિતઃ
    ક્સૌણિલગ્નભાલલોકપાલપાલિવન્દિતઃ ।
નિત્યકાલસૃષ્ટવિપ્રગૌરવાલિવન્દનઃ
    સ્વાઙ્ઘ્રિદાસ્યદોઽસ્તુ મે સ બલ્લવેન્દ્રનન્દનઃ ॥ ૪॥

લીલયેન્દ્રકાલિયોષ્ણકંસવત્સઘાતક-
    સ્તત્તદાત્મકેલિવૃષ્ટિપુષ્ટભક્તચાતકઃ ।
વીર્યશીલલિલાયાત્મઘોસવાસિનન્દનઃ
    સ્વાઙ્ઘ્રિદાસ્યદોઽસ્તુ મે સ બલ્લવેન્દ્રનન્દનઃ ॥ ૫॥

કુઞ્જરાસકેલિસીધુરાધિકાદિતોષણ-
    સ્તત્તદાત્મકેલિનર્મતત્તદાલિપોષણઃ ।
પ્રેમશીલકેલિકીર્તિવિશ્વચિત્તનન્દનઃ
    સ્વાઙ્ઘ્રિદાસ્યદોઽસ્તુ મે સ બલ્લવેન્દ્રનન્દનઃ ॥ ૬॥

રાસકેલિદર્શિતાત્મશુદ્ધભક્તિસત્પથઃ
    સ્વીયચિત્રરૂપવેષમન્મથલીમન્મથઃ ।
ગોપીકસુ નેત્રકોણભાવવૃન્દગન્ધનઃ
    સ્વાઙ્ઘ્રિદાસ્યદોઽસ્તુ મે સ બલ્લવેન્દ્રનન્દનઃ ॥ ૭॥

પુષ્પચાયિરાધિકાભિમર્ષલબ્ધિતર્ષિતઃ
    પ્રેમવામ્યરામ્યરાધિકાસ્યદૃષ્ટિહર્ષિતઃ ।
રાધિકોરસીહ લેપ એષ હરિચન્દનઃ
    સ્વાઙ્ઘ્રિદાસ્યદોઽસ્તુ મે સ બલ્લવેન્દ્રનન્દનઃ ॥ ૮॥

અષ્ટકેન યસ્ત્વનેન રાધિકાસુવલ્લભં
    સંસ્તવીતિ દર્શનેઽપિ સિન્ધુજાદિદુર્લભમ્ ।
તં યુનક્તિ તુષ્ટચિત્ત એષ ઘોષકાનને
    રાધિકાઙ્ગસઙ્ગનન્દિતાત્મપાદસેવને ॥ ૯॥

ઇતિ કૃષ્ણદાસકવિરાજવિરચિતં કૃષ્ણચન્દ્રાષ્ટકં સમ્પૂર્ણમ્ ।

---

*Krishna Chandra Ashtakam*

pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*